# Shri Gananatha Stuti Devarshayakrita

# દેવર્ષયકૃતા શ્રીગણનાથસ્તુતિઃ

## Document Information

Text title : Shri Gananatha Stuti Devarshayakrita

File name : gaNanAthastutiHdevarShayakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 31 | 6.31 8-23||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# દેવર્ષયકૃતા શ્રીગણનાથસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
નમસ્તેઽસ્તુ મયૂરેશ સર્વસિદ્ધિપ્રદાયક ।
જ્ઞાનદાત્રે સ્વભક્તેભ્યઃ પાલકાય નમો નમઃ ॥ ૮॥
સ્વાનન્દવાસિને તુભ્યં પરાત્પરતરાય ચ ।
ઢુણ્ઢિરાજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૯॥
અનાદયે ચ સર્વેષાં પૂજ્યાય પરમાત્મને ।
અનન્તાનનધારાયાનન્તરૂપાય તે નમઃ ॥ ૧૦॥
સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિવરાય ચ ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠેભ્યો વરદાય નમો નમઃ ॥ ૧૧॥
ત્રિનેત્રાય ચતુર્બાહુધરાય કઞ્જપાણયે ।
મહોદરાય સર્પેશનાભયે તે નમો નમઃ ॥ ૧૨॥
માયાશ્રયાય માયાયાશ્ચાલકાય વિલાસિને ।
બ્રહ્મણાં બ્રહ્મરૂપાય ગણેશાય નમો નમઃ ॥ ૧૩॥
એકદન્તાય સર્વાદિપૂજ્યાય સર્વમૂર્તયે ।
શૂર્પકર્ણાય યોગાય શાન્તિદાય નમો નમઃ ॥ ૧૪॥
પૂર્વાઙ્ગે વિષ્ણુરૂપાય દક્ષિણે શઙ્કરાત્મને ।
પશ્ચિમે શક્તિદેહાયોત્તરે તે ભાનવે નમઃ ॥ ૧૫॥
કિં સ્તુવીમો મયૂરેશં યત્ર વેદાશ્ચ યોગિનઃ ।
શાન્તિં પ્રાપ્તા વિશેષેણ દેવદેવેશ તે નમઃ ॥ ૧૬॥
ચિત્તં પઞ્ચવિધં દેવ તત્ર માયા ભ્રમાત્મિકા ।
ચિત્રા મયૂરસંજ્ઞા ચ નમસ્તત્ સ્વામિને નમઃ ॥ ૧૭॥
માયા મયૂરવાચ્યા તુ તત્ર ખેલકરો ભવાન્ ।
મયૂરેશ ઇતિ ખ્યાતઃ સાક્ષાદ્ દૃષ્ટો ન સંશયઃ ॥ ૧૮॥
જન્મ ધન્યં વયો વિદ્યા તપો જ્ઞાનાદિકં પરમ્ ।

તવાઙ્ઘ્રિદર્શનાન્નાથ કૃતકૃત્યા ભવામહે ॥ ૧૯॥
એવં તં નનૃતુઃ સ્તુત્વા ભક્ત્યા સાશ્રુવિલોચનાઃ ।
સરોમાઞ્ચા મયૂરેશ જયેતિ હ્યબ્રુવન્ પ્રભુમ્ ॥ ૨૦॥
જગાદ ગણનાથશ્ચ તતસ્તાન્ ભક્તિભાવિતઃ ।
વરાન્ વૃણુત દાસ્યામિ દેવેશા ભક્તિયન્ત્રિતઃ ॥ ૨૧॥
(ફલશ્રુતિઃ)
ભવદ્ભિર્યત્ કૃતં સ્તોત્રં મદીયં સર્વસિદ્ધિદમ્ ।
ભવિષ્યતિ સદા ભક્તિદાયકં પઠતે પરમ્ ॥ ૨૨॥
યં યમિચ્છતિ તં તં તુ દાસ્યામિ હર્ષસંયુતઃ ।
પઠેદ્વા શ‍ૃણુયાચ્ચેદ્વા મત્પ્રિયઃ સ નરો ભવેત્ ॥ ૨૩॥

ઇતિ દેવર્ષયકૃતા શ્રીગણનાથસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૩૧ । ૬.૩૧ ૮-૨૩॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 31 . 6.31 8-23..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Gananatha Stuti Devarshayakrita*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*